# संस्कृत-वार्ता:

दिनाङ्कः-07.11.2025 सायम् - 06:20

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी वन्देमातरम् इत्यस्य प्रशंसाम् कुर्वन् अकथयत् यत् वंदे मातरम् इति मन्त्रं भारतमात्रे , ऊर्जा, स्वप्नम्, संकल्पः च अस्ति। नवदिल्ल्यां राष्ट्रगीतस्य "वंदे मातरम्" इत्यस्य पञ्चाशदुत्तरैकशत-तम्याः वर्षपूर्त्यवसरे स्मरणोत्सवस्य उद्घाटनम् अकरोत् ।
- बिहार-विधानसभा-निर्वाचनस्य द्वितीयस्य अन्तिमस्य च चरणस्य निर्वाचनस्य प्रचारः चरमोत्कर्षं प्राप्नोत्। दलनेतारः प्रचाराभियाने रताः सन्ति ।
- सर्वोच्चन्यायालयः सार्वजनिकस्थलानि कुक्कुरैः अन्यपशुभिः च रक्षितु अवरोधान् प्रतिष्ठापनाय दिङ्निर्देषान् अयच्छत् ।
- भारतं मेलिसा-चक्रवातेन प्रभाविताय जैमैका-देशाय मानवीयसाहाय्यं प्रायच्छत् ।
- भारतीय-ऋतुविज्ञानविभागः अनुमानं प्रकटितवान् यत् आगामिषु अष्टचत्वारिंशत्-होरासु मध्यभारतक्षेत्रेषु तापमाने द्वे-डिग्रीमिततः चतुर्डिग्रीमितं यावत् न्यूनता भवितुं शक्नोति ।

## अथ वार्ताः विस्तरेण

### प्रधानमन्त्री-वन्देमातरम्

प्रधानमन्त्री नरेन्द्रमोदीः अद्य नवदिल्ल्यां राष्ट्रगीतस्य "वंदे मातरम्" इत्यस्य पञ्चाशदुत्तरैकशत-तम्याः वर्षपूर्त्यवसरे स्मरणोत्सवस्य उद्घाटनम् अकरोत् । अस्मिन् अवसरे प्रधानमन्त्रिणा स्मारक-मुद्रिकायाः मुद्रायाः च विमोचनं कृतम् । सः "vandemataram150.in" इति अन्तर्जाल-सङ्केतस्य अपि उद्घाटनम् अकरोत्, यत्र नागरिकाः राष्ट्रगीतस्य गायनं कृत्वा वीडियो इति संस्थाप्य प्रमाणपत्रं प्राप्तुं शक्नुवन्ति। नवदिल्ल्यां इन्दिरागान्धी-इन्डोर-स्टेडियम्- इति क्रीडाङ्गणे कार्यक्रमं सम्बोधयन् प्रधानमन्त्री अवदत् यत् वंदे मातरम् इति मन्त्रं, ऊर्जा, स्वप्नम्, संकल्पः च अस्ति । सः एतत् मन्त्रं भारतमातुः भक्त्याराधनयोः कृते प्रशंसितवान् यन्मन्त्रम् इतिहासं प्रति पुनः नयति, वर्तमानं आत्मविश्वासेन पूरयति, तथा च भविष्याय नूतनं साहसम् प्रयच्छति यथा किमपि संकल्पं साधयितुं शक्यते तथा च किमपि लक्ष्यं नास्ति यत् साधयितुं न शक्यते ।

गुरुदेवः रवीन्द्रनाथ-टैगोरवर्यः एकदा उक्तवान् यत् बङ्किमचन्द्रस्य 'आनन्दमठः' न केवलं उपन्यासः इति। एतत् स्वतन्त्रभारतस्य स्वप्नः अस्ति । बङ्किमचन्द्र-चट्टोपाध्यायः इत्यनेन लिखितस्य प्रत्येकस्य शब्दस्य गहनः अर्थः अस्ति । <u>वंदे मातरम् इति गीतं</u> प्रत्येकं युगे प्रासङ्गिकम् अस्ति इति प्रधानमन्त्री दृढतया अवोचत् ।

नवदिल्ल्याः उपराज्यपालः विनयकुमार-सक्सेना, केन्द्रीय-संस्कृति-पर्यटन-मन्त्री गजेन्द्रसिंह-शेखावतः, दिल्ल्याः मुख्यमन्त्री रेखागुप्ता च अस्मिन् कार्यक्रमे भागम् अगृह्णन्। सुविख्यातः बाङ्ग्ला-कविः उपन्यासकारः च बङ्किमचन्द्र-चटर्जी इत्यनेन लिखितं **वंदे मातरम्** भारतस्य जागरणस्य प्रतीकरूपेण वर्तते। यथा-यथा ब्रिटिश-औपनिवेशिक-शासनेन स्वबन्धनं दृढीकृतम्, तथा-तथा वंदेमातरम् भारतस्य स्वातन्त्र्य-आन्दोलने स्वरम् अवाप्नोत् । कालान्तरे, वंदे मातरम् इति स्वातन्त्र्ययोद्धृणां सामूहिकः घोषः अभवत्, मातृभूमिं प्रति प्रेमस्य भक्तेः च प्रतीकः, वैदेशिकशक्तिं विरुद्ध्य प्रतिरोधस्य घोषः च अभवत्। ध्यानास्पदं वर्तते यत् एतत् देशभक्तिगीतं संस्कृतभाषायां लिखितम् आसीत् ।

## बिहारनिर्वाचनम्

बिहार-विधानसभा-निर्वाचनस्य द्वितीयस्य अन्तिमस्य च चरणस्य निर्वाचनस्य प्रचारः चरमोत्कर्षं प्राप्नोत्। एन्. डी. ए. , महाघटबन्धन् इत्येतयोः दलयोः वरिष्ठनेतारः प्रमुख-प्रचारकाः च अन्यदलनेतृभिः सह मतदानक्षेत्रेषु भ्रमणं कुर्वन्तः सन्ति । औरंगाबादजनपदे एकां जनसभां संबोधयन् , भाजपादलस्य वरिष्ठनेता प्रधानमंत्री च नरेंद्रमोदी अकथयत् यत् एनडीएदलम एव विकसितस्य बिहारस्य निर्माणं करिष्यति । सः अकथय़त् यत् बिहारः एनडीए-दलस्य घोषणापत्रे विश्वसिति । सः आरोपं प्रख्यापितवान् यत् कांग्रेस-राजद-दले केवलं अपशब्दानां राजनीतिं कुरुतः।

भभुआजनपदे एकाम् अन्याम् जनसभां संबोधयन्, प्रधानमंत्री आरोपं प्रख्यापितवान् यत् राजद-कांग्रेस-दले बिहारस्य युवानः प्रथभ्रष्टं कर्तुं अनेकान् प्रयासान् अकुरुताम् परञ्च तयोः एताः योजनाः विफलीभूताः । सीमांचल्, मगध, शाहाबाद्, चम्पारण् इत्येतेषु मण्डलेषु विभिन्नेषु दलानां नेतारः सघनानि निर्वाचन-अभियानानि आचरन्ति । एन्. डी. ए. इत्यस्य अभ्यर्थिनां समर्थनाय जमुयी-नगरे निर्वाचनसमारोहं सम्बोधयन् भाजपा-दलस्य वरिष्ठः नेता ,केन्द्रीय-गृहमन्त्री अमितशाहः च अवदत् यत् एतत् निर्वाचनं बिहारस्य विकासस्य दिङ्निर्धारणं करिष्यति । काङ्ग्रेस्-दलस्य नेता राहुलगान्धीवर्यः बाङ्का-नगरे महाघटबन्धन-दलस्य अभ्यर्थिनां कृते जनसभां सम्बोधयत् । श्रीगान्धी अवदत् यत् बिहारस्य जनाः स्व-अधिकारविषये अवगताः सन्ति । आर्.जे.डी. दलस्य नेता तेजस्वी-प्रसाद-यादवः अररिया-नगरस्य जोकिहाट-नगरे निर्वाचनसमारोहं समबोधयत्। सः अवदत् यत् यदि महाघटबन्धन् सर्वकारस्य निर्माणं करोति तर्हि योग्य-महिला-लाभार्थीनां कृते माई-बहिन-योजनायाः अन्तर्गतं त्रिंशत्-सहस्र-रूप्यकाणि प्रदास्यन्ते । विधानसभानिर्वाचनस्य द्वितीये तथा अन्तिमे चरणे नवम्बरमासस्य एकादश-दिनाङ्के विंशति-मण्डलेषु द्वाविंशत्यधिकैकशतं विधानसभाक्षेत्रेषु मतदानं भविष्यति, मतानां गणना नवम्बरमासस्य चतुर्दशतमे दिनाङ्के भविष्यति।

## सर्वोच्चन्यायालयः-स्ट्रे-डॉग्स्

सर्वोच्चन्यायालयः अद्य अनेकान् निर्देशान् प्रायच्छत् येन प्रमुखेषु सार्वजनिकस्थलेषु नागरिकाः निराश्रयेभ्यः कुक्कुरेभ्यः रक्षिताः स्युः सहैव सार्वजनिकस्थलानि राजमार्गाणि च आश्रयहीनेभ्यः पशुभ्यः विमुक्तानि स्युः । देशे आश्रयहीनानां पशूनां प्रबंधनम् उद्दिश्य स्वतः संज्ञानं स्वीकुर्वन् न्यायमूर्तिः विक्रम-नाथः, न्यायमूर्ति संदीपमेहता ,न्यायमूर्ति एन.वी. अंजारिया इत्येतेषां पीठः आदेशं अयच्छत् यत् आश्रयहीनानां कुक्कुराणां प्रवेशम् अवरोद्धुम् प्रत्येकं शैक्षणिकसंस्थानेषु, चिकित्सालयेषु, सार्वजनिक-खेल परिसरेषु , बस-स्थात्रेषु रेलवेस्थात्रेषु च उचितावरोधकाः प्रतिष्ठापितव्याः ।

**<u>भारत-जमैका -चक्रवातसाहाय्यम्</u>**

भारतं मेलिसा-चक्रवातेन प्रभाविताय जैमैका-देशाय मानवीयसाहाय्यं प्रायच्छत् । सामाजिक-माध्यमेन जमैका-देशे भारतीय-उच्च-आयोगः अवदत् यत् ह्यः भारतीय-वायुसेनायाः विमानमाध्यमेन प्रायः विंशति-टन्-मितं मानवीय-साहाय्यं तथा आपद्-निवारणसामग्र्यः च कैरिबियन-राष्ट्राय प्रेषिताः सन्ति । आयोगः अवदत् यत् उपशमन-सामग्रीषु भीष्म इति विशिष्टाघात-चिकित्सा-विभागः, अपि च चक्रवातात् अनन्तरं उद्धारकार्याणि कर्तुं अन्यानि आवश्यकानि आपूर्तयः च सन्ति ।

**<u>विदेश-मंत्रालयः-पाकिस्तानः</u>**

भारतम् अद्य पाकिस्तानं विरुध्य आरोपं प्राख्यापयत् यत् तस्य गुप्तावैध-परमाणु-गतिविधयः तस्य इतिहासानुरूपं सन्ति, यानि दशकेभ्यः अवैधायाते, निर्यात-नियंत्रणोल्लंघने, गुप्त-सहयोगे, परमाणुप्रसारे च केन्द्रिताः सन्ति । अद्य अपराह्ने नवदिल्ल्यां वार्ताहरान् संसूचयन् , विदेशमंत्रालयस्य प्रवक्ता रणधीर-जायसवालः प्रोक्तवान् यत् भारतं सर्वदा अंतरराष्ट्रीयसमुदायस्य ध्यानं पाकिस्तानस्य एतादृशान् कार्याचरणान् प्रति आकर्षितम् अकरोत् ।

**<u>ऋतुविज्ञानविभागः</u>**

भारतीय-ऋतुविज्ञानविभागः अनुमानं प्रकटितवान् यत् आगामिषु अष्टचत्वारिंशत्-होरासु मध्यभारतक्षेत्रेषु तापमाने द्वे-डिग्रीमिततः चतुर्डिग्रीमितं यावत् न्यूनता भवितुं शक्नोति ।

।। इति वार्ताः ।।